— संगीतम् —

हरिश्चन्द्र - नाटकम्

— लेखक

संगीतम्

हरिश्चन्द्र - नाटकम्

लेखक-



प्रकाशक-

तपोवन-विद्यापीठ, प्रकाशन

वाराणसिवनी

मुद्रक :-
सविता-प्रेस,
वाराणसवनी

●

जून १९७३

●

प्रथमावृति
मूल्य-२)

दो शब्द

प्रस्तुत एकाङ्किका यद्यपि लगभग आठ दस वर्ष पहिले लिखी जा चुकी थी पर इसके प्रकाशन को समय दुर्भाग्य वश इसके पहले न आ पाया। संस्कृत भाषा को नृत्य नाट्य आदि विधाओं के माध्यम से प्रसार प्रचार के लिये मिले दो हजार रुपयों के सत्र १९७१–७२ के अनुदान के फलस्वरुप प्रकाशित 'रामं शरणं गच्छामि' नृत्यनाटिका की शृंखला में प्रस्तुत एकाङ्किका दूसरी कड़ी है।

चिरपरिचित कथा को संस्कृत के सरलतम परिचित शब्दों ही में नाटकत्व लाने का यह प्रयास मात्र है। एकाङ्किका के सारे गीत लोकपरिचित प्रिय धुनों पर आधारित हैं ताकि वे अपने परिचित कर्णमाध्युर्य ही से दर्शकों का मनोरंजन कर सकें। हास्यरस का समावेश करने के लिये विश्वामित्र के नौकर शार्दूल को कल्पित पात्र के रूप में प्रस्तुत किया है।

प्रस्तुत एकाङ्किका जन साधारण तथा विशेषतः बालकों में संस्कृत भाषा के प्रति यदि कुछ रुचि पैदा कर सकी तो लेखक अपने उद्देश्य को सफल समझेगा।

तपोवन-विद्यापीठ
वाराणसेवनी
सोमवार ४ जून १९७३

लेखक

एकांकिकायाः पात्राणि

पुरुषपात्राणि

१. हरिश्चन्द्रः—	अयोध्यायाः भूपालः
२. वसिष्ठः—	राजगुरुः
३. विश्वामित्रः—	हरिश्चन्द्रस्य परीक्षकः
४. नारदः—	ऋषिवर्यः
५. इन्द्रः—	देवराजः
६. शार्दूलः—	विश्वामित्रस्य भृत्यः
७. सत्यदेवः—	चाण्डालः हरिश्चन्द्रस्य क्रेता
८. धर्मदेवः—	श्रेष्ठी तारारोहितयोः क्रेता
९. नागराजः—	विषधरः
१०. रोहितः—	हरिश्चन्द्रस्य पुत्रः

११. सारंगः, जयन्तः परागः—रोहितस्य सहचराः

अधिकारी द्वारपालः, वेतालाः, भगवान्, काशीराजपुत्रः

अन्यानि पात्राणि

स्त्रीपात्रम्

१. तारामती—	हरिश्चन्द्रस्य राज्ञी

हरिश्चन्द्र-नाटकम्

प्रथमं-दृश्यम्

पात्राणि प्रार्थयन्ति

प्रार्थना

हर हर हे शंकर हे प्रलयंकर, हे गिरिजाधर अविनाशिन्,
हे रुद्र दिगम्बर हे गंगाधर नीलकण्ठ काशीवासिन् ।
कैलाशविहारिन् त्रिशूलधारिन् हे विघ्नेश्वर त्रिपुरारे,
शंभो जगदीश्वर महानटेश्वर पञ्चानन कन्दर्पारे ।
हे ताण्डवनर्तक विश्वप्रवर्तक, जगत्पितः हे विषपायिन्,
अवधूत त्रिलोचन भवभयमोचन, नन्दीश्वर श्मशानशायिन् ।
अहिधर कालेश्वर हे विश्वेश्वर मृत्युञ्जय पशुपतिस्वामिन्,
हे पिनाकधारिन् त्राहि त्राहि नः चन्द्रभाल गिरिवनगामिन् ।

(निष्क्रान्ताः)

द्वितीयं-दृश्यम्

स्थानं-इन्द्रपुरी समयः-प्रातःकालः

(इन्द्रः वसिष्ठविश्वामित्राभ्यां समेतः स्वासने उपविष्टः सन् गंभीरवार्तालापे निमग्नः । तस्मिन् एव क्षणे 'नारायण नारायण' इति रटन् वीणापाणिः नारदः प्रविशति । सर्वे स्वागतमुद्रायां उत्तिष्ठन्ति ।)

इन्द्रः—भवद्दर्शनेन सौभाग्यशाली अस्मि भगवन् । इदं आसनं अलंकृत्य अस्मान् उपकरोतु भवान् ।

वसिष्ठः--धन्योऽस्मि देवर्षे ।

विश्वामित्रः--सोऽहं ऋषिराज !

नारदः—'नारायण नारायण' सोऽहं ऋषिवर्यौ । पुण्योदयेन भवादृशानां पुण्यात्मनां दर्शनानि सुलभानि भवन्ति ।

इन्द्रः—अलं अनेन शिष्टाचारेण ऋषिवर्य । कुतः शुभागमनं इति भूत्वा धन्यभाग्यः भवेयमहम् ।

नारदः—'नारायण नारायण' अस्य प्रश्नस्य उत्तरप्रदानेन मयि विशेषः हर्षः भविष्यति । मृत्युलोके विचर्य अत्र आगतः अहम् ।

इन्द्रः--तस्मिन् मृत्युलोके किं विशेषं वर्तते भगवन् ।

नारदः—नारायण नारायण ! किम् विशेषम् ? तत्र सर्वेषु क्षेत्रेषु अन्तराणि सन्ति देवराज । देवानां आचारविचारेभ्यः मनुष्याणां आचारविचाराः सर्वथा महत्तराः श्रेष्ठतराश्च ।

इन्द्रः—महदाश्चर्यं भगवन् यत् मर्त्यलोकस्थेषु मनुष्येषु अपि ईदृशी जागृतिः संभूता यया स्वर्गस्थाः देवाः अपि लज्जिताः भवन्ति । देव—मनुष्ययोः ईदृशं अन्तरं अकल्पनीयं अस्माकं लज्जास्पदम् च ।

वसिष्ठः—सदाचारः देवानां अपि एकमात्रः अधिकारः नास्ति देवराज । श्रमसंपादितसंपदः देवत्वेन संपादितसंपदभ्यः सर्वथा सहस्त्रगुणिताः श्रेष्ठतराः भवन्ति । श्रमः एव जीवानां पौरुषम् । तेन विना देवाः अपि अपूजनीयाः गर्हणीयाश्च ।

इन्द्रः—निकृष्टतमानि पापानि अपि देवान् तेषां पदेभ्यः अधः पातयितुं न समर्थानि ऋषिवर्य । देवत्वं जन्मसिद्धाधिकारः । तस्मात् च्युतं कर्तुं देवसंहितायां यत्र कुत्र अपि उल्लेखः न वर्तते ।

नारदः—नारायण नारायण ! अस्माकं ईदृशी धारणा प्रमादानां जननी भविष्यति देवराज । अयोध्यानगर्यः एकः एव हरिश्चन्द्रः सर्वान् अपि देवान् तिरस्करोति दानशीलतया । सः भगवान् शंकरः इव आशुतोषः । तस्य प्रासादात् यः कः अपि याचकः विफलः न निवर्तते देवराज ।

विश्वामित्रः—भगवतः नारदस्य उक्त्यां मे का अपि का जाता । हरिश्चन्द्रः दानी उदारचेता वा भवेत् किन्तु तस्य

प्रसादात् यः कः अपि याचकः विफलः न निवर्तयिष्यति इति उक्तिः अकल्पनीया ।

वसिष्ठः—ईदृशं अशोभनीयं वाक्यं हरिश्चन्द्रं प्रति कदापि न वक्तव्यं ऋषिवर्य । भगवतः नारदस्य उत्कृयां लेशमात्रः अपि संदेहः न वर्तते । प्रकाशे तमः तमसि प्रकाशः अपि संभावनीयः किन्तु हरिश्चन्द्रस्य दानशीलतायां ईदृश्याः शंकायाः अपि स्थानं अकल्पनीयंअकल्पनीयम् ।

विश्वमित्रः—गुरवे कुपात्रशिष्यः अपि दर्शनीयः अपेक्षणीयश्च । अनेन सिध्दान्तेन भगवतः वचः तु शोभनं ऋषिवर्य किन्तु वस्तुतः स्थितिः तत्र अन्यथा ।

इन्द्रः—क्षमस्व भगवन् मे वचः । (विहस्य) एषः भगवतः नारदस्य एव दोषः । भगवतः शुभागमनं यदा कदा कलहस्य एव परिचायकम् । यत् भवेत् भवतु । हरिश्चन्द्रं आश्रित्य ईदृशः वादविवादः अस्मिन् काले तु सर्वथा असंगतः अवाञ्छनीयश्च । मर्त्यलोके ईदृशः मनुष्यः भवेत् सः तु राजा दुर्लभः सर्वथा दुर्लभः यस्य गृहात् प्रासादात् वा यः कः अपि याचकः विफलः न निवर्तते ।

वसिष्ठः—देवराज ! एतद् मे ब्रह्मवाक्यम् । तत् अन्यथा कदापि न भविष्यति ।

विश्वामित्रः—असंभवम् देवर्षे । ईदृशेन दानिना पुत्रेण मर्त्यलोकवसुन्धरा अद्यापि पुत्रवती न जाता । वृथा प्रलापेन किम्?

नारदः—'नारायण नारायण' अतः मे प्रस्तावः। तस्य हरिश्चन्द्रस्य दानशीलता अचिरं महर्षिविश्वामित्रेण एवं परीक्षितव्या। कस्य वचः सत्यं कस्य वा असत्यं इति शीघ्रं संभविष्यति।

विश्वामित्रः—विना परीक्षया मे मतं निश्चितं यत् मे परीक्षायां हरिश्चन्द्रः विफलः भविष्यति। मर्त्यलोके वसुन्धरा ईदृशं पुत्रं एव न प्रसूतवती यस्य गृहात् प्रासादात् वा याचकः विफलः न निवर्तेत।

वसिष्ठः—परीक्षया विना ईदृश्यः वाचः भवतः जिह्वायां न शोभन्ते ऋषिवर्य। विधातुः सृष्टिः अकल्पनीया। तस्यां सर्वे कल्पनांतीत : चमत्काराः अपि संभवनीयाः।

इन्द्रः—भगवतः नारदस्य प्रस्तावः सुष्ठुतरः। तं अहं अपि पुष्टी-करोमि। राजाहरिश्चन्द्रस्य परीक्षा शीघ्रं एव भवितव्या। सा एव अस्माकं वादविवादं निःशेषं करिष्यति।

वसिष्ठः—परीक्षा एव भवतु। यावत् हरिश्चन्द्रस्य परीक्षा न भवति तावत् ऋषिवर्यस्य विश्वामित्रस्य ईदृशं प्रमादजन्यं वचः वक्तुं लेशमात्रः अपि अधिकारः नास्ति।

नारदः—नारायण नारायण! अहं अपि तत् एव मन्ये। हरिश्चन्द्रस्य परीक्षा एव भवेत्। तया किं मलं किं सुवर्ण इति शीघ्रं प्रकटं भविष्यति।

विश्वामित्रः—सर्वदा परीक्षा सर्वथा परीक्षा एव । तस्यां जनाः अधोगतिं गच्छन्ति प्रथमं । तस्याः परीक्षायाः विरलाः एव जनाः उद्भवन्ति । अतः हरिश्चन्द्रः वस्तुतः परीक्षितव्यः इति विचारणीयम् ।

इन्द्रः—शोभनं शोभनम् ।

नारदः—नारायण नारायण !

वसिष्ठः—परीक्षायाः कातरजनाः अपि भीताः सन्ति । वीरजनेभ्यः परीक्षा उन्नतेः सोपानं अतः सर्वथा स्वीकरणीया । हरिश्चन्द्रः अवश्यं परीक्षितव्यः ।

विश्वामित्रः—अस्तु ! भोः करुणे । दये । सहानुभूति ! वत्सलते । सर्वाः यूयं मृत्युलोकात् विलीनाः भवेयुः । भोः हृदय ! त्वं पाषाणत्वं नहि वज्रत्वं प्राप येन हरिश्चन्द्रस्य क्षानशीलता ———यां आश्रित्य ऋषिराजवसिष्ठः ईदृशं गर्वं करोति अन्यथा भवेत् । अन्यथाभवेत् ।

नारदः—नारायण ! नारायण !

द्वितीयं-दृश्यम्

स्थानम्-राजमार्गः समयः-प्रातःकालः

शार्दूलः-(विजयापात्रं ग्रहीत्वा) त्वं विजयां भज त्वं विजयां भज त्वं विजयां भज हे मूढ़मते ।

-: स्तवनम् :-

वंदे भगवतीं विजयां ऋषिमुनिजनतारिणीम् ।
यस्याः विना प्रसादेन, दुस्तरः भवसागरः ।।
हे विजयामातः श्रीविजयामातः ।
त्वां भजति शार्दूलः, ननु सायं प्रातः ।।
त्वां पिबति यः नित्यं, अबलः अति क्षीणः ।
सः शार्दूलवत् भवति च, सबलः अतिपीनः ।।
त्वं हालाहलजननी, मदिरायाः माता ।
त्वां सेवते नित्यं, रुद्रः जगत्पिता ।।
पीत्वा त्वां यथेष्टं, विचलति पदे पदे ।
विक्षिप्तः इव प्रलपति, तव भक्तः वरदे ।।
विजयां पीत्वा यः कः करोति लघुकर्म ।
शिवः ददाति च तस्मै, भूतिं मृगचर्म ।।
सतयुगस्य विजये हे, त्रेतायाः सुरे ।
द्वापरस्य वारुणि हे, कलियुगस्य मदिरे ।।
नानास्वरूप-धारिणि, महाजननि विजये ।
त्वां भजति यः नित्यं, पतति न विपदि क्षये ।।

अतः हे परमजननि ! अनेकेषु जन्मसु अपि तव कमलचरणानि दुर्लभानि मा भवेयुः । त्वां यथेष्टं पीत्वा मत्तः अभवम् अहम् । अतः गृहं गत्वा अचिरेण निद्रां गमिष्यामि ।

[निष्क्रान्तः]

—नेपथ्ये—

त्वं विजयां भज, त्वं विजयां भज, त्वं, विजयां भज मूढ़मते ।
अंगं कलितं ललितं मुण्डम् ।
दशनसमेतं जातं तुण्डम् ॥
पुनरपि खरलं पुनरपि दण्डम् ।
पुनरपि विजया पुनरपि भाण्डम् ॥
त्वं विजयाँ भज, त्वं, विजयां भज, त्व विजयां भज, मूढ़मते ।

विश्वामित्रः—(प्रविश्य) यत्र कुत्र महान् वेदपाठः इति मन्ये । (उच्चैः) रे शार्दूल !

शार्दूलः—(नेपथ्ये) कः असि ! शार्दूल—शार्दूल—सदा शार्दूलस्य एवं निरन्तरं रटनम् । (उच्चैः) शार्दूलः नहि जागर्ति ।

विश्वामित्रः—सः किं करोति ?

शार्दूलः—सः स्वपिति ।

विश्वामित्रः—तदा कः वदति ?

शार्दूलः—भवान् एव वदति ।

विश्वामित्रः—रे ! अभ्यन्तरे कः वदति ?

शार्दूलः—अभ्यन्तरे विजया वदति ।

विश्वामित्रः—विजया का ?

शार्दूलः—मम माता ।

विश्वामित्रः—त्वं कः ?

शार्दूलः—विजयापुत्रः ।

विश्वामित्रः--सा तव माता कथम् ?

शार्दूलः--तव माता यथा ।

विश्वामित्रः—विक्षिप्तः असि रे दुष्ट ! स्वस्वामिनं अपि न जानासि ।

शार्दूलः—स्वस्वामिनं कथं न जानामि ? तव स्वामिनं न जानामि ।

विश्वामित्रः--अहं तव स्वामी ।

शार्दूलः—मम स्वामी । मम स्वामी तु महर्षिः विश्वामित्रः ।

विश्वामित्रः--सः अहम् ।

शार्दूलः—(प्रविश्य कम्पन् एवं प्रलपन् करंबध्वा) भोः स्वामिन् ! क्षमस्व ! क्षमस्व ! भवन्तं ज्ञातुं असमर्थः अभवम् अस्वस्थत्वे अन्यथा कथं एतद् भवेत् ।

विश्वामित्रः—सदैव मत्तः इव प्रलपसि । कः एषः

मदिरपेयस्य आवेशः येन त्वं विक्षिप्तः इव जल्पसि । स्वस्वामिनं अपि ज्ञातुं न समर्थः ।

शार्दूलः- स्वस्वामिनं ज्ञातुं एव अत्र आगतः भगवन् ।

विश्वामित्रः--तूष्णीं भव ! अर्थमनर्थं भावय । शृणु ! श्वः अयोध्यानगरीं गत्वा राजाहरिश्चन्द्रस्य सर्वाणि दण्डचामर-छत्राणि राजचिह्नानि आवां गृहिष्यावः । अतः त्वं तत्र गमनाय सावधानः भवः ।

शार्दूलः--किम् एभिः मम एव अभिषेकः भविष्यति भगवन् ?

विश्वामित्रः--कथं एवं वदसि रे मूर्ख ।

शार्दूलः--अन्यथा ऋषिवर्याय एषां किं प्रयोजनम् ?

विश्वामित्रः--प्रयोजनं भवेत् न वा । किन्तु त्वं श्वः एतस्मै कार्याय सावधानः तिष्ठ ।

शार्दूलः--यत् आज्ञापयति देवः ।

(विश्वामित्रः निष्क्रान्तः)

गतः ! गतः ! गतः !

अतः—

त्वं विजयां भज, त्वं विजया भज, त्वं विजयां भज मूढ़मते ।
अर्थं मनर्थं भावय नित्यम् ।
नास्ति तत्र सुखलेशः सत्यम् ।।

पुत्रादपि धनभाजः भीतिः ।
अतः भवतु तव विजया-प्रीतिः ।।
त्वं विजयां भज, त्वं विजयां भज, त्वं विजयां अज, मूढ़मते ।

[निष्क्रान्तः]

तृतीयं-दृश्यम्

स्थानं-अयोध्यानगरी समय-मध्याह्नः

(महाराजाधिराज-हरिश्चन्द्रस्य सभायां महामंत्री, सचिवाः आमात्याः तथा अन्ये कर्मचारिणः यथास्थानं उपविष्टाः ।)

महामंत्री-एतावत् पर्यन्तं महाराजाधिराजहरिश्चन्द्रः सभायां नागता । एतद् तु असामान्यं एव वर्तते । किं श्रुतं भवद्भिः किं अपि महाराजाधिराजस्य स्वास्थ्यविषये ।

सचिवः--उषसि तु जागरणतूर्यध्वनिः श्रुत । किन्तु प्रधानद्वारात् मंगलवादनानि तत्पश्चात् मया न श्रुतानि ।

महामंत्री-एतत् तु कस्य चित् अनिष्टस्य द्योतकम् । भोः द्वारपाल ! किं आनीता काचित् कुशलमंगलवार्ता कैश्चित् संदेशवार्ताहारिभिः ।

द्वारपालः-अधुनापर्यन्तं कः अपि संदेशहारी न आगतः

भगवन् । अद्य तु अन्ये अन्तःपुरपरिचारिकाः अपि यथावत् न दृश्यन्ते भगवन् ।

महामंत्री—अन्तःपुर-परिचारिकाः अपि एतत् क्षणपर्यन्तं न दृष्टाः त्वया । किं तत्र प्रधानप्रासादे राजमंगलपताका उड्डीयते न वा ?

द्वारपालः—(दृष्ट्वा) भोः भगवन् । राजमंगलपताका न दृश्यते । तत्र केवलं सुरक्षापताका एव उड्डीयते ।

[नेपथ्ये]

भोः कर्मचारिणः रविकुलशिरोमणिः महाराजाधिराज-हरिश्चन्द्रः सभां प्रविशति । तत्र उपस्थिताः जनाः सावधानाः दक्षाः भवेयुः ।

(महाराजहरिश्चन्द्रः आगत्य सिहांसने उपविशति । सर्वे उत्तिष्ठन्ति प्रणमन्ति पश्चात् राजाज्ञया उपविशन्ति च ।)

महामंत्री—रविकुलशिरोमणिमहाधिराजस्य कमलमुखं-पूर्ववत् प्रफुल्लं न वर्तते । किं भगवति काचित् पीड़ा जाता ?

हरिश्चन्द्रः—या का अपि पीडा न महामंत्रिन् । गतरात्र्याः कश्चित् स्वप्नः एव मम अशान्तेः कारणम् ।

महामंत्री—स्वप्नं प्रति स्वप्नवत् एव आचरणीयः भगवन् । तस्मिन् कस्याश्चित् चिन्तायाः एव कारणं नास्ति ।

हरिश्चन्द्रः—रविकुलसंभूतानां नृपाणां जागृतेः निद्रायाः स्वप्नस्य वा सर्वाः अवस्थाः समानाः । तासु एकस्यां अपि अवस्थायां यत् अस्माभिः कृतं तत् कदापि न परिवर्तनशीलम् ।

महामंत्री—किन्तु स्वप्ने किं जातं भगवन् । वयं सर्वे श्रोतुकामाः ।

हरिश्चन्द्रः—महामंत्रिन् । रात्रौ मया एकः स्वप्नः दृष्टः । तस्मिन् स्वप्ने सर्वायाः अयोध्यायाः राज्यं मया एकस्मै ऋषये दत्तम् । अन्यस्मै दत्ते राज्ये अस्माभिः क्षणमापि एकं न स्थातव्यम् ।

महामंत्री—(आश्चर्येण) भवद्भिः दत्तम् सर्वं राज्यम् ।

हरिश्चन्द्रः—आम । महामंत्रिन् ।

महामंत्री- स्वप्नः सदा स्वप्नवत् एव मन्तव्यः भगवन् । ईदृश्यः अनेकाः घटनाः स्वप्नेषु उदभूयन्ते विलीयन्ते च यासां स्मृतिः अपि न भवति जनेषु ।

हरिश्चन्द्रः—स्मृतिः भवेत् वा न भवेत् । अस्माकं वंशीयेभ्यः यत् भूतं तत् भूतम् । तत्र किंचित् परिवर्तनं अपि न स्पृहयामः वयम् ।

(नेपथ्ये)

भोः कुत्र अस्ति सः दानी हरिश्चन्द्रः ?

विश्वामित्रः-(प्रविश्य) कुत्र अस्ति तव स्वप्ने दत्तं मे अयोध्याराज्यम् ।

हरिश्चन्द्रः-(उत्थाय) दातुकामोऽहं अत्र तिष्ठामि भगवन् । एतत् तव राज्यम् । एते भवतः कर्मचारिणः ।

विश्वामित्रः-राजवस्त्रालंकरण मुकुटादिसमर्पणेन विना कथं ईदृशं दानम् ? एतद् न दानम् । एतद्दानस्य उपहासः ।

हरिश्चन्द्रः-(मुकुटं अवतार्य विश्वामित्रं प्रति) गृह्यतां भगवन् एषः मुकुटः ।

कर्मचारिणः-महाराज ! एतद् किम् ?

विश्वामित्रः-एतान् विद्रोहिणः कर्मचारिणः स्वीकृत्य अहं किं करिष्यामि नृपहरिश्चन्द्र । एतत् मम अधिपत्यस्य अवहेलनम् ।

हरिश्चन्द्रः-क्षमस्व भगवन् ! (कर्मचारिणः प्रति) भोः कर्मचारिणः । अद्यतः भवन्तः सर्वे ऋषिवर्य विश्वामित्रस्य कर्मचारिणः । श्रीमतः विश्वामित्रस्य आज्ञा सर्वथा भवद्भिः शिरोधारणीया ।

(कर्मचारिणः तूष्णीं तिष्ठन्ति । हरिश्चन्द्रः वस्त्रालंकरणानि अवतार्य विश्वामित्राय ददाति)

हरिश्चन्द्रः-तारे ! रोहित ! तारे ! शीघ्रं आगच्छ आगच्छ प्रिये । वत्स । रोहित । युवयोः सर्वाणि वस्त्रालंकरणानि अन्यानि राजचिह्नानि वा सर्वाणि ऋषिराजस्य चरणयोः सादरं समर्पितव्यानि ।

(नेपथ्ये)

आगच्छावः आर्यपुत्र ।

विश्वामित्रः–विलम्बेन दत्तं दानं न ग्रहणीयम् । अतः गच्छामि अहं । अहं तव दानस्य बुभुक्षितः नास्मि ।

हरिश्चन्द्रः–क्षमस्व भगवन् ! तत् सर्वं अचिरं एव सम्पद्यते ।

(तारामतीरोहितसमेतं प्रविशति)

समर्पितव्यानि सर्वाणि वस्त्रालंकरणानि राजचिह्नानि वा क्षिप्रम् युवाभ्याम् ।

तारा– राजमुकुटं अवतारय रोहित । वस्त्राभूषणानि अपि अवतारय । एतानि सर्वाणि अस्माकं अद्य न सन्ति । तानि सर्वाणि एव ऋषिवर्यस्य ।

रोहितः–एतानि सर्वाणि अस्माकं एव मातः । अहं न यच्छामि एतस्मै ऋषये ।

विश्वामित्रः– भोः अतीव विलम्बः भविष्यति । ईदृशेन दानेन प्रयोजनं किम् ? तिष्ठतु तत् तत्रैव । अहं गच्छामि ।

हरिश्चन्द्रः–क्षमस्व भगवन् ! बालः तु अबोधः । क्षन्तव्यः तस्य अपराधः । (रोहितंप्रति) । प्रयच्छवत्स सर्वाणि तानि वस्त्रालंकरणानि ।

रोहित.–सः ऋषिः एतानि अलंकरणानि किं करिष्यति ?

तारा-एव मा वद वत्स । ऋषिराजः अस्माकं पूजार्हः । तं प्रति अभद्रं न वक्तव्यम् । (राजवस्त्रालंकरणानि रोहितात् हृत्वा विश्वामित्राय ददाति)

रोहितः-(रुदित्वा) न दास्यामि न । दास्यामि । एतानि सर्वाणि अस्माकं एव । न यस्य कस्य ? अहं अधुनातः किं धारयामि ? किं धारयामि ?

तारा-वत्स ! अस्माकं भाग्येषु अद्यपर्यन्तं एव तेषां धारणं लिखितं विधिना ।

रोहितः-भविष्ये कः धारयिष्यति एतानि ?

तारा-यः कः अपि धारयेत् वत्स । वयं न धारयिष्यामः ।

विश्वामित्रः- (सर्वं गृहीत्वा) अस्य दानस्य शान्तिदानं षष्टि स्वर्णमुद्राः कुत्र ? ताभिः बिना दानं अपूर्णं भविष्यति ।

हरिश्चन्द्रः-ताः राजकोषात् एव प्राप्तव्याः भगवन् ।

विश्वामित्रः-(क्रोधितः सन्) राजकोषात् । कस्य राजकोषात् ? राज्यस्य दानं पश्चात् अत्र युस्माकं तृणं अपि नास्ति । एते सर्वे ममैव ।

हरिश्चन्द्रः-अस्माकं सांनिध्ये अधुना किम् अपि नास्ति भगवन् । स्वर्णमुद्राभ्यः क्षमस्व ।

विश्वामित्रः-पुरा मया कथितं एव । अहं एतानि सर्वाणि लब्धुकामः नास्मि । गृह्यतां एतानि सर्वाणि । अहं गच्छामि । षष्टिस्वर्णमुद्राभिः बिना एतत् सर्वं व्यर्थम् ।

हरिश्चन्द्रः—तदा ताः षष्टिस्वर्णमुद्राः अस्माकं विक्रयेण लब्धव्याः भगवन् । अस्माकं त्रयाणां मूल्यं षष्टिस्वर्णमुद्राः अवश्यं भविष्यति ।

विश्वामित्रः—किन्तु अत्र कः क्रीणाति युस्मान् ? अत्र सर्वाः ते प्रजाः ।

हरिश्चन्द्रः—एतेषु अस्माकं प्रजाजनेषु यथा संभवम् मा विक्रीणीयात् भगवन् ! अन्येषु नगरेषु अस्माकं विक्रयणं अपि सुलभं भविष्यति ।

विश्वामित्रः—अत्र मे इच्छा प्रमाणम् हरिश्चन्द्र । युष्माभिः अत्र किं अपि न वक्तव्यम् । (आहूय) शार्दूल ! शार्दूल ।

शार्दूलः—(हर्षेन् उत्पतन् प्रविश्य) भोः भगवन् । (राजवस्त्राभूषणराशिं दृष्ट्वा) अहा ! एतानि सर्वाणि राजवस्त्रालंकरणानि ! एतैः किं मम राज्याभिषेकं भविष्यति भगवन् ।

विश्वामित्रः—रे मूर्ख । अत्र असंगतं न वक्तव्यम् । एते सर्वे काशीपुरीं नेतव्याः । तत्र ते विक्रीतव्याः षष्टिस्वर्णमुद्राभिः । ताः स्वर्णमुद्राः पश्चात् मह्यं दातव्याः शीघ्रम् । (महामंत्रिणं प्रति) महामंत्रिन् ।

महामंत्री—(करबद्धः प्रणम्य) भगवन् ।

विश्वामित्रः—घोषकैः घोषितव्यम् यत् अद्यतः अयोध्या-नगर्यां विश्वामित्रस्य एव शासनम् ।

महामंत्री—यत् आज्ञापयति भगवन् ।

(प्रजाजनाः आगच्छन्ति रुदन्ति च)

हरिश्चन्द्रः—भो प्रजाजनाः ! अद्यपर्यंतं वयं युस्माकं राजा । अद्यतः ऋषिवर्यः विश्वामित्रः एव युस्माकं सर्वेषां राजा संजातः । अद्यतः ऋषिवर्यस्य एव शासनं शिरोधार्यम् ।

(विश्वामित्रः गच्छति । एकस्यां पंक्तयां कतिपयाः जनाः अन्यस्यां शेषाः जनाः । मध्ये स्त्रीपुत्रभ्यां समेतः हरिश्चन्द्रः तिष्ठति । सर्वे प्रजाजनाः उच्चैः निश्वस्य रुदन्ति प्रलपन्ति च)

:-: गीतम् :-:

प्रजाजनाः— कुत्र भवान् ! कुत्र भवान् ! कुत्र भवान् ।
प्रजाजनान् सर्वथा त्यक्त्वा
गच्छसि कुत्र वनानि नगान् ।।

—१—

करिष्यति च किं हन्त ! विधाता ।
महती विपद् सर्वथा जाता ।
ऋषिवर्यः आगत्य हरति खलु
जनानां प्राणान् ।। कुत्र ।।

–२–

नाशं गता अयोध्या नगरी ।
आयाता नः कालशर्वरी ।
अत्र भ्रमन्ति मृत्युदूताः
ते उद्घाट्य मुखान् ।। कुत्र ।।

–३–

हरिश्चन्द्रः–अलिखत् यत् भाग्ये च विधाता ।
तेन विपद् एषा संजाता ।
विक्रयाय गच्छेम सुदूरम्
भोः प्रणभ्य सर्वान् ।। कुत्र ।।

[अवतिका पतति]

——०:०——

चतुर्थम्–दृश्यम्

स्थानम्–राजमार्गः — समयः–प्रातःकालः

(राजमार्गे घोषकः घोषयन् इतस्ततः भ्रमति)

घोषकः–(डिंडिमं वादयन्) भोः अयोध्यावासिनः अयोध्यायां महाराजाधिराजहरिश्चन्द्रस्य राज्यं समाप्तम् । अद्यतः अस्यां नगर्यां ऋषिराज–विश्वामित्रस्य राज्यं आरभते । अतः ऋषि–राजस्य आज्ञा सर्वाभिः प्रजाभिः शिरोधार्या इति शृणुत भोः अयोध्यावासिनः ।

(पुनः वादयित्वा निर्गच्छति)

पंचमं-दृश्यम्

स्थानं-इन्द्रपुरी समयः-सायंकालः

(इन्द्रः देवैः परिवृतः उपविष्टः। विश्वामित्रः प्रविशति। सर्वे उत्थाय विश्वामित्रं प्रणम्य स्वेषु स्वेषु स्थानेषु उपविशन्ति।)

इन्द्रः-धन्यभाग्याः स्मः ऋषिराज। कुतः आगतः भवान्। विशेषः श्रान्तः इव दृश्यते।

विश्वामित्रः-विना श्रमेणमर्त्यलोके जीवनं न संभाव्यते देवराज। सः मर्त्यलोकः देवानां स्वर्गः नास्ति यत्र केवलं कामनया एव सर्वाणि वस्तूनि सम्पाद्यन्ते।

इन्द्रः-ज्ञातं मया भगवन्। हरिश्चन्द्रं परीक्षितुकामः गतः आसीत् भवान् मर्त्यलोकम्। जाता तस्य परीक्षा? किं तस्य परीक्षाफलम्।

विश्वामित्रः-परीक्षा तु अद्यतः आरब्धा। तस्याः फलाय चिरं कालं अपेक्ष्यते।

इन्द्रः-किन्तु तस्य परीक्षाफलस्य प्राग्रूपं भवता ज्ञातं इति मन्ये।

विश्वामित्रः-हरिश्चन्द्रात् प्राप्तं मया तस्य सर्वं राज्यम्। शान्तादानाभावेन सः स्त्रीपुत्रौ आत्मानं च विक्रेतुं काशीनगरीं गतवान्।

इन्द्रः—सः अवश्यमेव परीक्षानिकषे सफलः भविष्यति इति अहं मन्ये ।

विश्वामित्रः—अधुना तस्य परीक्षाफलस्य प्रारूपं अपि न संभविष्यति । तस्य परीक्षाफलस्य मार्गे महत्यः विपदः अनेके गिरिसमुद्राः च आपतिष्यन्ति । मम परीक्षा सुतरां न भविष्यति देवराज ।

इन्द्रः—का अपि मे सेवा अपेक्षणीया अस्मिन् परीक्षाकाले ।

विश्वामित्रः—(उत्थाय) सत्यधर्मौ चाण्डालश्रेष्ठिनौ निष्ठुररूपे समादाय स्त्रीपुत्रसमेतं हरिश्चन्द्रं काशीनगर्यां क्रतुं गच्छताम् ।

इन्द्रः—आज्ञां शिरसि धारयामि भगवन् । प्रेषयामि तौ द्वौ शीघ्रम् ।

(विश्वामित्रः निष्क्रान्तः)

षष्ठं—दृश्यम्

स्थानं—वनमार्गः समयः—मध्याह्नः

(स्त्रीपुत्रशादूलैः सह हरिश्चन्द्रः चलने असमर्थः सन् मन्दं मन्दं विचरति)

— गीतम् —

रोहितः—

हा हन्त हे भगवन् । हा हन्त हे भगवन् ॥
करुणेश्वर शंकर ।

दुःखानि नः च हर ।।
सुलभां तव कृपां शिव,
अस्मासु त्वं विकर ।। हा ।।

२.

अङ्गानि सर्वथा गलन्ति,
दिशि दिशि चलने ।
पथि पथि च विचलने ।।
भगवन् कृपां कुरु कुरु नः,
संकटे दलने ।। हा ।।

३.

त्रस्ताः क्षुध्पिपासया,
संजायते व्यथा ।
कीदृशी नः कथा ।।
निर्बोध-रोहितं महेश,
पीडयसि वृथा ।। हा ।।

४.

द्रष्टुं न समर्था च यान्,
गृहे रविप्रभा ।
भूमौ सुधा सुलभा ।
जाता विपिने तेभ्यः,
छायाऽपि दुर्लभा ।। हा ।।

तारा—हे तात मा दुःखितः भव ईदृशः । एतानि अपि दिवसानि गमिष्यन्ति ।

हरिश्चन्द्रः- मन्दं मन्दं चल रोहित । काशीपुरी आयाता एव । तत्र गत्वा अस्माकं सर्वाणि दुखानि दूरं पलायिष्यन्ति ।

शार्दूलः—(धावन् प्रविश्य) भोः हतभाग्यौ हरिश्चन्द्र । किं का अपि मे चिंता नास्ति त्वयि वा । गायन् नृत्यन् उत्पतन् स्त्रीपुत्राभ्यां समेतं द्रुततरं एव धावसि । मम विजयापानं अपि न जातम् ।

हरिश्चन्द्रः- कण्टकाकीर्णे मार्गे मे स्त्रीपुत्रौ चलने असमर्थौ स्तः शार्दूल । अहं अपि चलने असमर्थः । इह कथं विजयापानम् ?

शार्दूलः—अरे हरिश्चन्द्र । मां शार्दूलमहोदयं केवलं नग्ननाम्ना एव संबोधयसि ?

"शार्दूल महोदयः शार्दूल महोदयः" इति वक्तव्यं त्वया । विजया अपि आनेतव्या ।

हरिश्चन्द्रः- क्षमस्व शार्दूल । अत्र विजया कुतः ?

शार्दूलः—पुनः 'शार्दूल'

हरिश्चन्द्रः—अस्तु ! शार्दूल महोदय ।

शार्दूलः—अथकिम् । त्वं चलने असमर्थः तर्हि समर्थः कः । अहं तु एव विधं पीनं शरीरं संचालने तस्य महन्तंभारं वहने तथा सुदूरं काशीपुरीं तं नयने सर्वथा असमर्थः अस्मि— असमर्थः अस्मि । अस्मिन् कार्ये विजया भवानी एव महतीं सहायतां करिष्यति ।

हरिश्चन्द्रः—सा काशीनगर्यां एव क्वचित् सुलभा भवेत् शार्दूल ।

शार्दूलः—पुनः अपि शार्दूल ।

हरिश्चन्द्रः—रे शार्दूल महोदय ।

शार्दूलः—रे हरिश्चन्द्र । हरिश्चन्द्रस्य विक्रेता अनादरसूचकेन 'रे' शब्देन न संम्बोधनीयः अन्यथा महत् संकटम् आपतिष्यति ।

तारामती—वयं सर्वमेतत् करिष्यामः येन अत्र किं अपि संकटम् न भवेत् हे शार्दूल महोदय ।

शार्दूलः—बाढम् । बाढम् मां सम्बोधने सर्वथा शार्दूलत्वं एव अपेक्षते ।

(रोहितः नेपथ्ये गत्वा शार्दूलः इव गर्जति । तां गर्जनां श्रुत्वा शार्दूलः भयभीतः सन् इतस्ततः धावति । हरिश्चन्द्रस्य पृष्ठे कम्पन् आत्मानं गूहयति ।)

तारामती—(विहस्य) एषा का रोहित ।

रोहितः—एषा शार्दूलस्य गर्जनायाः अनुकृतिः । शार्दूल महोदयस्य संतोषार्थं मया शार्दूलत्वं व्याघ्रगर्जनामनुकृत्य दर्शितम् ।

शार्दूलः—(कम्पन् विलपन्) दुष्ट बालक । सा न व्याघ्रस्य गर्जनायाः अनुकृतिः । सा साक्षात् व्याघ्रगर्जना । रे हरिश्चन्द्र । रक्ष । रक्ष । मां रक्ष ।

हरिश्चन्द्रः—भोः शार्दूलमहोदय ! शार्दूल नामधारी भवान् शार्दूलगर्जनात् कथं विभेषि ? अपरं च सा अनुकृतिः न । सा तु यथार्थं शार्दूलस्य गर्जना ।

शार्दूलः—अतः इतः चलितुं असमर्थः ।

हरिश्चन्द्रः-अनेन वेगेन काशी नगरीं गन्तुं अनेकानि दिवसानिगमिष्यन्ति। पुनः अस्मिन् निर्जने वने यः कः सिंहकः पशुः सिंहः शार्दूलः व्याघ्रः वा आगच्छेत् । अस्मान् सर्वान् व्यापादयेत् ।

शार्दूलः-(वेगेन धावन् विलपन् वा) सिंहः । शार्दूलः । व्याघ्रः । व्यापादयेत् । धावत । धावत । वनात् बहिः शीघ्रं गच्छत । गच्छत ।

[शार्दूलः धावन् निष्क्रान्तः । सर्वे अनुसरन्ति]

सप्तमं-दृश्यम्

स्थानम्-काशीराजमार्गः समयः-प्रातःकालः

(घंटाशंखतूर्यध्वनयः श्रूयन्ते । धर्मदेवः सत्यदेवः च दृश्येते ।)

धर्मदेवः- एषा एव नगरीकाशी ।

सत्यदेवः-धन्या एषा पुण्यपुरी । अस्याः स्थितिः भगवतः शंकरस्य त्रिशूले एव ।

धर्मदेवः-तस्मात् कारणात् एव अस्याः पुर्यः वासिनः अनायासं एव मोक्षं लभन्ते ।

सत्यदेवः- अस्तु । नारीपुत्राभ्यां समेतः हरिश्चन्द्रः काशीनगरीं सम्प्राप्तः । तं आवां एव क्रेष्यावः ।

धर्मदेवः—आम्। भवान् चाण्डालस्य रूपं धृत्वा अत्र शीघ्रं उपस्थितः भवतु। अहं अपि श्रेष्ठिनः रूपं धृत्वा शीघ्रं आगच्छामि। (तौ निष्क्रान्तौ।)

चणकंविक्रेता-(गायन् प्रविश्य)

१.

ग्रह्यतां भोः तप्तः चणकः।
गृह्यतां भोः तिक्तः चणकः।
गृह्यतां भोः खट्टः चणकः।
गृह्यतां भोः रुचिरः चणकः॥

२.

चणकं खादति नगरी काशी।
निवसति यत्र शिवः अविनाशी॥
मोक्षं लभते यत्र निवासी।
धर्माचार्यः यत्र विलासी॥

३.

चणकं खादति यः च मनुष्यः।
शीघ्रं भवति सद्गुरोः शिष्यः।
भूमौ विमलः तस्य भविष्यः।
समरे रिपुभिः सदा अवश्यः॥

४.

चणकं खादति या सा नारी।
तस्याः पतिः तु ब्रह्मचारी॥
चणकं खादति या सा दासी।

तस्याः पतिः भवति सन्यासी ।।

५.

चणकं खादति यः सः नेता ।
प्रतिनिधिवरणे भवति विजेता ।।
चणकं खादति यः सः बालः ।
शीघ्रं भवति मेदिनीपालः ।।

६.

चणकं खादति मंत्रीवर्गः ।
तस्मै सुलभः भुवां स्वर्गः ।।
चणकं खादति यदि करदाता ।
रक्षति तं केवलं विधाता ।।

७.

गृह्यतां भोः तप्तः चणकः ।
गृह्यतां भोः तिक्तः चणकः ।।
गृह्यतां भोः खट्टः चणकः ।
गृह्यतां भोः रुचिरः चणकः ।
सप्तः चणकः । तप्तः चणकः ।।

[निष्क्रान्त]

हरिश्चन्द्रः—(स्त्रीपुत्रशार्दूलैः सह प्रविश्य पुरजनान्)

गीतम्—

काशी निवासिनः क्रीणन्तु ।
षष्टिस्वर्णमुद्राः केवलं नः क्रयणे च भवन्तु ।।
विपणे दासः विपणे दासी विपणे बालकदासः ।

षष्टि स्वर्णमुद्राः मूल्यं, नहि यः कः अभिलाषः ।।
भविष्यन्ति अस्माभिः सुलभाः ताः परिचर्याः ।
क्रीणन्तु क्रीणन्तु यथेष्टं भोः काशीनरवर्याः ।।
ये प्रासादे हन्त ! एकदा, विक्रयाय ते विपणे ।
रक्षतु नः सः त्रिशूलधारी, धर्मसत्यनिर्वहणे ।।

शार्दूलः—भोः क्रीणन्तु एतान् दासीदासान् । क्रीणन्तु भवन्तः क्रीणन्तु । स्वल्पं मूल्यम् । यथेष्टा सेवा । पर्याप्तं सुखम् । परमः आनन्दः । भोः क्रीणन्तु । क्रीणन्तु । भवन्तः क्रीणन्तु । एषः अवसरः पुनः अलभ्यः ।

प्रथमपुरजनः—तव किं मूल्यम् ?

शार्दूलः—अहं नास्मि विक्रयार्थं । विक्रयार्थं एते त्रयः । सः दासः । सा दासी । सः बालकदासः । मूल्यं षष्टिमुद्राः । अहं तेषां स्वामी ।

द्वितीयपुरजनः—किंतु त्वं एव तेषां दासः इव दृश्यसे । यदि त्वं विक्रयार्थं नासि तर्हि त्वं मूल्यं कथय ।

शार्दूलः—भो अहं शार्दूलः । शार्दूलः जगति तु न विक्रीयते ।

तृतीय पुरजनः—जगति शार्दूलः एव विक्रयणीयः । आवश्यकता तस्य कौतुकालये प्रदर्शनाय । नटीनटाः अपि शार्दूलस्य विचित्राः क्रीडाः दर्शयित्वा स्वोदराणि भरन्ति ।

शार्दूलः—विचित्रा काशीपुरी दृश्यते । दासीदासानां स्थाने स्वामिनः एव क्रेतुं इच्छन्ति जनाः ।

प्रथमपुरजनः—तव सदृशः विचित्रः प्राणी सदैव क्रयणीयः ।

[पुरजनाः निष्क्रान्ताः]

शार्दूलः—अत्र सर्वे मूर्खाः इति मन्ये । भोः क्रीणन्तु एतान् दासीदासान् भवन्तः । स्वल्पं मूल्यम् । यथेष्टा सेवा । पर्याप्तं सुखम् । परमः आनन्दः । भोः क्रीणन्तु । क्रीणन्तु । भवन्तः क्रीणन्तु ।

चाण्डालः—(सत्यदेवः चाण्डालस्य वेषे आगत्य) एकं दासं क्रेतुं इच्छामि । किं मूल्यं एतस्य दासस्य । किन्तु अहं चान्डालः अस्मि ।

हरिश्चन्द्रः—यः वा कः वा भवान् भवेत् किन्तु वयं स्त्री पुरुषपुत्राः । यदि अस्मान् सर्वान् एकः एव सज्जनः क्रेष्यति तर्हि वयं कौटुम्बिक—सुखात् न वञ्चिताः भविष्यामः । अस्मान् पृथक् पृथक् वा क्रीणन्तु भवन्तः ।

श्रेष्ठी:—(श्रेष्ठिनः वेषे धर्मदेवः) दासाः सर्वथा दासाः न मानवाः अपि । कौटम्बिक-सुखानि तेभ्यः कुत्र ?

तारा—कौटुम्बिक—सुखाय अस्माकं प्रार्थना भगवन् ।

धर्मदेवः-दासीभिः न प्रार्थितव्यम् । स्वामीनां इच्छा दासीनां इच्छा । सा कदापि न अन्यथा भवेत् । अस्तु । एषः तव बालः । किं सः अपि अस्माकं सेवां करिष्यति ?

रोहितः-करिष्यामि ! करिष्यामि ! माम् अपि क्रीणन्तु भवन्तः किन्तु अहं मातापितृभ्यां सह निवसितुं मे इच्छा ।

चाण्डालः-अहं केवलं एकं दासं क्रीणामि । अन्यौ क्रेतुं न मे इच्छा ।

हरिश्चन्द्रः-भोः भगवन् का ते लीला ! अस्तु । भवान् समर्पयतु विंशतिस्वर्णमुद्राः अस्मै सज्जनाय । भोः तारे । रोहित । वक्रीतः अहम् विंशतिस्वर्णमुद्राभिः । गच्छामि अहं स्वामिना सह । सुखेन पुत्रेण सह वसतु ।

तारा-आवयोः सम्मुखं आर्यपुत्रः अन्यत्र गन्तुं न अर्हति । आवां प्रथमं प्रेषय आर्यपुत्र येन आवाभ्यां यत् किं अपि दुःखं न भविष्यति ।

श्रेष्ठी-अस्तु ! गृह्यतां चत्वारिंशत् स्वर्णमुद्राः । आगच्छतम् युवां मया सह । मातापितृपुत्राणां एकत्वं एव विसर्जनं भवतु ।

(चाण्डालः श्रेष्ठी स्वर्णमुद्राः शार्दूलाय प्रयच्छतः । दक्षिणपक्षे चाण्डालेन सह हरिश्चन्द्रः वामपक्षे श्रेष्ठिना सह तारारोहितौ इत्यन्ते ।)

गीतम्—

हरिश्चन्द्रः—पुत्रः कुत्र पिता च कुत्र कुत्र अपि गमिष्यति माता ।
तारा—राजत्वे दासत्वं लिखितं नः भाग्येषु विधाता ।।
हरिश्चन्द्रः—वसतु सुखेन सुतेन समेतं, हे मम प्रेयसि तारे ।
तारा—सहिष्यामहे भविष्यति च यत्, यत् इह नः संसारे ।।
रोहितः—तात । तात ।
हरिश्चन्द्रः—रोहित ! रोहित ।
तारा—आर्यपुत्र । आर्यपुत्र ।
हरिश्चन्द्रः—तारे ! तारे !

(सर्वे रुदन्तः विसर्जन्ति)

अष्टमं-दृश्यम्

स्थानं—इन्द्रपुरी समयः—प्रातःकालः

[इन्द्र विश्वामित्रौ परस्परं संभाषेते]

इन्द्रः—प्रणमामि ऋषिवर्य ।

विश्वामित्रः—शुभमस्तु ते देवराज ।

इन्द्रः—कुतः आगमनम् ऋषिवर्य ।

विश्वामित्रः—मर्त्यलोकात् आगच्छामि देवराज ।

इन्द्रः- हरिश्चन्द्रः एतस्यां परीक्षायां सफलः भविष्यति इति कथ्यते देवैः ।

विश्वामित्रः-भविष्यति वा न भविष्यति इति अकल्पनीयम् साम्प्रतम् ।

इन्द्रः-राज्यहस्तातरणं तु सविधं संजातम् इतिश्रुतम् ।

विश्वामित्रः-षष्टि स्वर्णमुद्राणां हरिश्चन्द्रः चाण्डालेन क्रीतः । तस्य स्त्रीपुत्रौ एकः श्रेष्ठी क्रीतवान् ।

इन्द्रः-धन्योऽसि हरिश्चन्द्र ।

विश्वामित्रः-किन्तु परीक्षायाः कठिनः भागः अद्यापि शेषः । तस्याः परीक्षायाः मृत्युः अपि भीतः भविष्यति ।

इन्द्रः किं परीक्षायाः हरिश्चन्द्रस्य उत्तरणं न संभविष्यति ।

विश्वामित्रः-तत् समयः एव सूचयिष्यति ।

(निष्क्रान्तौ)

नवमं-दृश्यम्

स्थानम्-काशीमार्गः समयः-प्रातःकालः

-भो द्वारपाल ! आगतः सः नागराजः ।

ल:-आगतः देव । स तत्र द्वारे तिष्ठति । आगन्तुं भवतः पेक्षते ।

श्रेष्ठी-प्रेषय तम् । अहं शीघ्रं द्रष्टुं इच्छामि ।

द्वारपालः-शीघ्रं प्रेषयामि देव ।

नागराजः-(प्रविश्य) प्रणमामि देव ।

श्रेष्ठी-सकुशलं भव नागराज ! अद्य एकं महत् आवश्यकं कार्यं कर्त्तव्यम् ।

नागराजः-तत् किम् देव ! यथादिष्टं शीघ्रं भविष्यति ।

श्रेष्ठी-तत् शृणु । अधुना अहं हरिश्चन्द्रस्य पुत्रं उद्यानं पुष्पेभ्यः प्रेषयिष्यामि पुष्पाणि चिन्वन्तं तं बालकं एवं दंश येन सः तत्र एव पञ्चत्वं गच्छेत् ।

नागराजः-निर्दोषबालकं ईदृशेन दशनेन अहं रौरवनरकगामी भविष्यामि भगवन् ।

श्रेष्ठी-किन्तु मे आज्ञा अन्यथा न भवेत । तत् अवश्यं एव कर्तव्यम् ।

नागराजः-यत् आज्ञापयति भवान् ।

(निर्गच्छति)

श्रेष्ठी-(उच्चैः) रोहित । रोहित !

तारा-(आगत्य) अपराधः क्षम्यः भवतु भगवन् । रोहितः स्वपिति ।

श्रेष्ठी-रोहितः स्वपिति । सः कः स्वामी वा दासः ! द्वारपाल । केशं गृहीत्वा तं अत्र आनय ।

तारा-(करौ बध्वा) ईदृशं न भवतु देव । तस्य स्थाने अहं गच्छामि ।

श्रेष्ठी- यदि त्वं एव तस्य स्थाने गच्छसि तर्हि तस्य कः उपयोगः ? सः एव गच्छतु उद्यानम् । तस्मात् पूजार्थं पुष्पाणि आनीतव्यानि शीघ्रम् ।

तारा-यत् आज्ञापयति देवः ।

[सर्वे निष्क्रान्ताः]

[रोहितः अन्यैः बालकैः सह प्रविशति]

जयन्तः-रोहित ! तव माता तु दासी । तव पिता कः ?

रोहितः-मम पिता नृपः ।

बालकाः-(उच्चैः हसित्वा) तव पिता नृपः ।

परागः-नृपस्य पुत्रः दासः कथम् । रोहित ! तव निवासः कुत्र अभवत् ।

सारंगः-प्रासादे वा कुटीरे ?

रोहितः-कुटीरे ! प्रासादे ।

सर्वे-तस्य निवासः । (दीर्घं हसित्वा) प्रा - सा - दे—। राजपुत्र ?

जयन्तः-कुत्र गतं तव राज्यं रे रोहित ?

रोहितः-पित्रा दानेन दत्तम् ।

परागः-(अट्टहासंकृत्वा) अस्य पिता राज्यस्य दानं करोति ।

सारंगः- सः तु श्रेष्ठिनः गृहे क्रीतदासः (दीर्घं हसति) ।

जयन्तः-तव पितुः वस्त्राणि आसन् न वा ?

रोहितः-वस्त्राणि आसन् । सिंहासनानि आसन । मुकुटाः आसन् ।

(सर्वे अट्टहासं कुर्वन्ति)

(निष्क्रान्ताः)

दशमं-दृश्यम्

स्थानम्-उद्यानम् समयः-प्रातःकालः

[रोहितः अन्यैः बालकैः सह उद्यानं गायन् प्रविशति]

गीतम्—

रोहितः-

मुकुलितेषु पुष्पेषु हसति सः तरौ तरौ नवमधुमासः ।

प्रसरति दिशि दिशि नवकुसुमानां मलयज सुरभित नववासः ।।
नीडे नीडे खगकुलगानं कुञ्जे कुञ्जे रतिलासः ।
फुल्लंति वकुलः लसति पलाशः गुम्फति तरुलतापाशः ।।
नृत्यति पवनः नदति मेदिनी, सुधा च वर्षति आकाशः ।
गिरौ गिरौ भूमौ अवतरितः वैकुण्ठात् देववासः ।।

अनेन गानेन अलं मित्राणि ! अहं पुष्पाणि । त्रोट्यामि अन्यथा विलम्बः भविष्यति ।।

जयन्तः—त्वं विलम्बात् भीतः असि रोहित ।

परागः—कथं न स्यात् । सः दासः । दासीपुत्रः ।

सारंगः—वयं दासाः न स्मः । यथेच्छं यः अस्मभ्यं रोचते तत् एव करिष्यामः ।

जयन्तः—रोहिताय राजभवनं रोचते ।

परागः—सः तु सिंहासनं पश्यति ।

सारंगः—कुत्र ! स्वप्ने ?

[कृष्णसर्पः आगत्य यत्र तत्र धावति]

जयन्तः—भोः । सर्पः । सर्पः । सर्पः ।

[कृष्णसर्पः रोहितं दशति निर्गच्छति च]

परागः—अदशत् । अदशत् । रोहितं अदशत् ।

सारंगः-किं अदशत् रोहितम् ।

जयन्तः-गच्छामि रोहितस्य मातरं सूचनार्थम् ।

पराग:-धाव । धाव जयन्त । आनय अस्य मातां शीघ्रम् ।

सारंगः-हे भगवन् । किं अपि अनिष्टं न भवेत् ।

रोहितः-आह ! आह !

[विलपति]

गीतम्—

अदशत् मां विषधरः भगवन् ।
कालः कथं दुस्तरः भगवन् ॥

[१]

निकटे त्वं अपि नहि हे मातः ।
तिष्ठति कुत्र मम प्रियः तातः ॥
यमपुरीं रोहितः प्रस्थितः ।
भवतु प्राणत्राता मे भगवन् ।

[२]

आगच्छति मयि हा ! व्याकुलता ।
देहे मे वर्धते शिथिलता ॥
सः मृत्युः परितः धावति मे ।
भाग्यगतिः का जाता भगवन् ॥

[३]

मम मातरं सत्वरं गत्वा ।
प्रेषय मित्र इदं कथयित्वा ।।
तव पुत्रः प्रस्थितः यमपुरं ।
आगच्छतु मे माता भगवन् ।।

[चेतनाहीनः भुवि पतति]

तारा-[विलपती प्रविश्य] मम रोहित । मम जीवनम् । तात किं भूतम् ? कुतः सः विषधरः आगतः । तव दशनात् प्राक् सः किं मां न अवशत् (क्रोडे गृहीत्वा) मम पुत्र । मम रोहित । तव माता त्वां सम्बोधयति । त्वां आह्वयति । अरे कथं न भाषसे । राज्यवंचितः । वस्त्रावासवंचितः । पितुः स्नेहवंचितः । सः अद्य जीवनवंचितः अपि संजातः । नहि । नहि । रोहितः मृतः नास्ति । (अट्टहासंकृत्वा) सः स्वपिति । यावत् सः स्वपिति मया शयनगीतानि गीयन्ते ।

गीतम्—

हे शिवशंकर भाग्यः कथं करालः ।
भूतले स्वपिति मे बालः ।।

[१]

अद्यापि न त्यक्तं क्षीरम् ।
कोमलं अतीव शरीरम् ।
तं दशति कथम्, वक्रः क्रूरः व्यालः ।।

[२]

निकटे न पिता वा माता ।
का बेला सा संजाता ।
नृत्यति मृत्युः परितः सः विकरालः ।।

[३]

शोभना कथं मुखमुद्रा ?
एषा च कुतः चिरनिद्रा ।
तं भ्रान्तिः सा अनयत् स्वपुरं कालः ।

जयन्तः–(आगत्य) भोः रोहितमातः । यथादिष्टं निवेदितं मया सर्वं श्रेष्ठिने महोदयाय । सः कथयति कुतः वस्त्रम् ? कस्मै वस्त्रम् दासाय वा दासशवाय वा किं अपि वस्त्र नावश्यकीयम् । दासस्य चिता कंटकाकीर्णा पृथ्वी तथा शवछादनवस्त्रं स्वयं मेव नीलगगनम् । तेन पुनरुक्तम् — दासस्य शवाय किंचित् शवछादनवस्त्रं चितायां च काचित् ज्वालाः न दीयते । शृगालश्वानगृध्रोलूककाकाः दासशवस्य नाशसंस्कारं कर्तुं एव पूर्णरूपेण समर्थाः ।

तारा–(कर्णौपिधाय इतस्ततः धावन्ती विक्षिप्तावत्) भोः किं कथितं तेन ? किं श्रुतं मया ! ..... दासस्य शवाय किंचितशवछादनवस्त्रं वा चितायां काचित् ज्वाला न दीयते । शृगालश्वानगृध्रोलूककाकाः दासशवस्य नाशसंस्कारं कर्तुं एव पूर्णरुपेण समर्थाः । भोः वसुन्धरे । मानवहीनाजाता भवती । मनुष्यः वा पाषाणः । नहि नहि मनुष्यः । नहि नहि पाषाणः । पाषाणः अपि

द्रवति गलति पृथिव्यःक्षुत्पिपासाशान्त्यै किं पुनःदाहसंस्काराय । भोः सूर्यवंशीयदिवंगतात्मानः । युस्माषु केन अपि ज्ञातं यत् स्ववंशीयचक्रवर्तिनः हरिश्चन्द्रस्य पुत्रः स्वशवछादनवस्त्रं अपि न लभते । भोः युस्माकं धर्मकर्माणि सर्वथा नष्टानि यत् भवतः वंशीयपुत्रशवस्य ईदृशी दयनीयादशा संजाता । अस्तु । एषा मम जीर्णा शाटिका । तस्याः अधोभागं छित्वा अस्य शवछादनवस्त्रं करिष्यामि ।

[तथा करोति तथा शवं छादयति]

भोः ! हसत ! सूर्यवंशीयदिवंगतात्मानः । हसत । नृत्यत । भवतः वंशीयबालकस्य शवाय तस्य मातुः शाटिकार्धं एव तस्य शवछादनवस्त्रं संजातम् ।

[अट्टहासं कृत्वा पुनः गायति]

(३)

शोभना कथं तव मुद्रा ।
एषा च कुतः चिरनिद्रा ।।
तं भ्रान्तिः सा अनयत् स्वपुरं कालः ।
भूतले स्वपिति मे बालः ।।

एकादशमं-दृश्यम्

स्थानम्-काशीमार्गः समयः-मध्याह्नः

(विश्वामित्रः सत्यदेवः परस्परं संवदतः)

विश्वामित्रः-भोः सत्यदेव ! धर्मदेवः त्वां किं भवत् ?

सत्यदेवः–किं अपि न अवदत् ऋषिवर्य ।

विश्वामित्रः–अथ शृणु । हरिश्चन्द्रस्य पुत्रः सर्पदंशेन पञ्चत्वं गतः ?

सत्यदेव.–अथ किम् ?

विश्वामित्रः–तस्य दाहक्रियायै तस्य माता सद्यः वा कालान्तरं तं श्मशानं आनेष्यति । अस्मिन् एव काले काशीराज्य-पुत्रः जलविहाराव अनेन मार्गेण एव गच्छति । सः अत्र एव हन्तव्यः ।

सत्यदेवः–काशीराजपुत्रः अत्र एव हन्तव्यः । शान्तं पापम् । शान्तं पापम् ।

विश्वामित्रः–एवं मा वद सत्यदेव । एषा तु धर्मपरीक्षा । अनया कः अपि पापस्य भागी न भविष्यति ।

सत्यदेवः–तस्य हत्यया किं भविष्यति ?

विश्वामित्रः– तस्याः हत्यायाः अपराधः हरिश्चन्द्रस्य-भार्यायां एव स्थापितव्यः ।

सत्यदेवः–तेन किम् ।

विश्वामित्रः–हत्यायाः अपराधात् हरिश्चन्द्रस्य भार्या दण्डनीया भविष्यति ।

सत्यदेवः—ततस्ततः ।

विश्वामित्रः—हरिश्चन्द्रः एव स्वमार्यायै मृत्युदण्डं दातुं भवता नियोजितव्यः ।

सत्यदेवः—तेन किम् ।

विश्वामित्रः—भार्याप्रेम्णा यदि हरिश्चन्द्रः स्वधर्मात् विचलति तर्हि मे लक्ष्यः पूर्ण एव भविष्यति ।

सत्यदेवः—वाढम् । वाढम् । यत् भवता आदिष्टं तत् अवश्यं करिष्यामि ।

विश्वामित्रः—तूष्णीं भव । तूष्णीं भव । सः एकाकी एव काशीराजपुत्रः आगच्छति । गृह्यतां एषा छुरिका । (छुरिकां ददाति) अनया एव अत्र क्षिप्रं हन्तव्यः सः ।

काशीराजपुत्रः—(प्रविश्य) भोः कः त्वम् ?

सत्यदेवः—(छुरिकया काशीराजपुत्रं हन्ति)

काशीराजपुत्रः— (अभ्यन्तरं गत्वा) रे राक्षस । हा मृतः अस्मि । गतोऽहम् । मृतोऽहम् ।

[सर्वे निष्क्रान्ताः]

द्वादशं-दृश्यम्

(पिशाचाः वेतालाः अट्टहासं कुर्वन् गायन्ति नृत्यन्तिच ।)

गीतम्—

हा हा ! हि हि ! हा !!
हा हा ! हि हि ! हा !
वयं मृत्युसंदेशवाहिनः
भयंकराः भयावहाः ।। हा ।।

१.

वयं चण्डश्मशान-शायिनः ।
वयं भयंकरकष्ट-दायिनः
खादामः नरमासं रुचिरम् ।
सदा पिबामः तप्तं रुधिरम् ।। हा ।।

२.

वयं भयंकर - बेतालाः ।
ईक्षामहे चिताज्वालाः ।
वयं कुरूपवक्रतुण्डाः ।
बीभत्साः रुण्डमुण्डाः ।। हा ।।

३.

अस्तिपंजरित - कंकालाः ।
मृत्युप्रतीक - मुण्डमालाः ।
काकोलूक शृंगाल खराः ।
दासाः नः निशाचराः ।। हा ।।

(हरिश्चन्द्रं दृष्टवा पलायिताः)

(चिता रुण्ड मुण्डान् दृष्ट्वा)

हरिश्चन्द्रः—

गीतम्—

कंकालाः चिताः रुण्डमुण्डाः किरन्ति ज्ञानम् ।
मिथ्या मयायाः दर्पणं एतदेव श्मशानम् ॥

१.

धनं धरा नारी पुत्रः बान्धवो तथा प्रासादः ।
सर्वे ते गच्छन्ति विनाशं, नदति यदा यमनादः ।
सर्वेषां राज्ञां सर्वथा अत्र एव अवसानम् ।

२.

उपविशन्ति सिंहासनेषु ये, सकलविश्वजेतारः ।
गणनातीतमहासेनानां भूमौ ये भर्तारः ॥
अत्र विलीयन्ते खलु सर्वे, अत्र गलति अभियानम् ॥

(मृतरोहितं हस्ताभ्यां अनयतीं तारां दृष्ट्वा)

भोः का त्वं ? पिशाचिका वा वेताली । अस्यां भयंकर-रात्रौ ईदृशी भ्रमती का अपि मृत्योः संदेशवाहिनी तु न वर्तसे ? भोः घोषय ! कथय !

तारा—न पिशाचिका न वेताली किन्तु एका भाग्यहता नारी ।

हरिश्चन्द्रः—नारि ? (दीर्घं हसित्वा) ईदृश्यां रात्रौ यस्यां भूतपिशाचाः रुधिरं पिबन्तः मांसं खादन्तः यत्र तत्र सर्वत्र भ्रमन्ति स्वैरम्—यस्यां श्वाभृगालोलूकानां रोदनैः भयप्रकम्पिना श्मशान-भूमिः, यस्यां निशाचराशुभरुतैः वेपमाना कालरात्रिवेला ? कथं आगता त्वं अस्यां मृत्युरात्रौ ?

तारा—(रुदित्वा) स्वपुत्रशवदाहक्रियायै अहं आगता अत्र ।

हरिश्चन्द्रः—अस्यां भयंकररात्रौ ? स्वपुत्रशववाहिनि ? हे भाग्यहीने नारि ! नास्ति अस्मिन् ससारे यः कः अपि तव बन्धुः ? कुत्र ते भर्ता ? अस्मात् अपरः नहि कश्चित् अन्यः पुत्रः ?

तारा—(शवं भूमौ संस्थाप्य) हे देव ! हतभाग्यायाः अस्मिन् ससारे कः बन्धुः भविष्यति ? मम भर्ता अपि मत् दूरात्, अन्यत्र यस्य कस्य अपि सेवायां एव वर्तते । मम एषः एव पुत्रः । सः अपि पंचत्वं गतः ।

हरिश्चन्द्रः—सर्वेषां एषा एव गतिः नारि । अस्तु। श्मशाननियमेन त्वया शवदाहसंस्काराय एका मुद्रा दातव्या ।

तारा—मम सकाशे किं अपि नास्ति ? अहं एकां मुद्रां दातुं सर्वथा असमर्था । वस्त्राभावे मम शाटिकार्धमेव मम-पुत्रस्य शवस्य छादनवस्त्रं सञ्जातम् ।

हरिश्चन्द्रः—असत्यं वदसि देवि । तव कण्ठस्थ तत् लसन् भूषणं एव कथं न ददासि ?

तारा-(विस्मिता) भोः कण्ठस्य लसन् भूषणम् । तत् तु मम मंगलसूत्रम् । सूर्य-वंशीयात् अन्यः तत् कश्चित् अपि द्रष्टुं न समर्थः ।

हरिश्चन्द्रः-हा ! किं तारे !

तारा-महाराजहरिश्चन्द्र ।

हरिश्चन्द्रः-किं एषः रोहितः ? हे प्राणपुत्र ! नव कुसुमशायिनः ईदृशी दशा वर्तते । उत्तिष्ठ रोहित् किं अपि कथं न वदसि ? किं जातं आवयोः पुत्राय ? कथं सः पचत्वं गतः ?

तारा-तं कः अपि विषधरः अदशत् ।

हरिश्चन्द्रः-एषः पुत्रः कुत्र गतवान् । तत्र कथं सः विषधरः एनं प्रियपुत्रं अदशत् ।

तारा-एषः प्रियपुत्रः स्वामिनः अज्ञया उद्यानं कुसुम-संचयार्थं एव गतवान् । तत्र एव कः अपि विषधरः तं अदशत् ।

हरिश्चन्द्रः-(विलपन्) हा ? कुसुमसंचयं कुर्वन्तं रोहितं उद्याने विषधरः अदशत् । तारे । तारे । रोहित । मम प्रियसुत । मम हृदय । प्राणाः । भोः अस्माकं वंशीय-दिवंगतात्मानः । भवन्तः लज्जानतशिरसः न भवेयुः यत् भवतां कुलोत्पन्नस्य बालकस्य शवाय एकं शवच्छादनवस्त्रं अपि नोपलब्धम् । तस्य स्थाने एव मातुः शटिकार्धं शवच्छादनवस्त्रं संजातम् । कुतः गतः युस्माकं

विभवः ? कुत्र युस्माकं चक्रवर्तित्वम् । किं एकेन अपि कालपदाघातेन सर्वं शून्यं जातम् ? आश्चर्यं एतत् यत् तत् सर्वं मम भाग्ये एव लिखितम् विधिना । (रोहितं दृष्ट्वा) भो कुसुमशय्याशायिन् रोहित । अस्यां प्रगाढ़निद्रायां एव कथं ईदृशः पतितः तात यत् मां प्रलपन्तं पितरं किम् अपि भाषितुं न समर्थः ?

भोः पुत्र ? मया मतं यत् अहं एव तव स्कन्धारूढः श्मशानं गत्वा तव हस्ताभ्यां एव दाहसंस्कारं गमिष्यामि किन्तु अद्य तु सर्वं विपरीतं एव संजातम् । मातुः हस्तयोः आरूढस्य पुत्रशवस्य पितुः हस्ताभ्यां एव दाहसंस्कारं भविष्यति इति चक्रवर्तिनः हरिश्चन्द्रस्य एव भाग्यलेखा । (रुदति)

तारा- अतः मुद्रायै क्षमस्व आर्य । रोहितदाहसंस्काराय मुद्रया विना आज्ञा दातव्या ।

हरिश्चन्द्रः—तत् तु कथं अपि न संभविष्यति तारे ! मुद्रया विना पुत्रस्य शवः अदग्धः एव स्थास्यति ।

तारा- तत् कथं भविष्यति भगवन् । चक्रवर्तिनः हरिश्चन्द्रस्य पुत्रशवः अदग्धः तिष्ठेत् सा तु विधेः विडम्बना ।

हरिश्चन्द्रः—यत् किं अपि भवेत् तारे ! किन्तु विना मुद्रां रोहितस्य शवः अदग्धः एव स्थास्यति । एषा एव स्वामिनः आज्ञा ।

(चाण्डालेन सह राज्याधिकारी सकुठारः प्रविशति)

राज्याधिकारी—सा एव नारी यया काशीराजपुत्रः हतः । तस्याः हत्यायै दण्डः निर्दिष्टः ।

चाण्डालः–तस्याः कः दण्डः देव ।

कर्मचारीः–तवसेवकः एव अनेन कुठारेण शीघ्रं तस्याः शिरस्छेदनं करिष्यति । अत्र किमपि अन्यथा न भवेत् । गृह्णातु एनं कुठारं

चाण्डालः–भवतः वाक्यं प्रमाणं देव । एतत् एव भविष्यति । (कुठारं गृण्हाति)

तारा–किन्तु अहं निरपराधा । मम पुत्रः तु विषधरदंशेन पञ्चत्वं गतः । एका अबला असहाया नारी ईदृशं जघन्यं कर्म कथं करिष्यति ।

अधिकारी–सर्वथा असत्यं एव तव कथनं नारि । (चाण्डालं प्रति) चाण्डाल ।

चाण्डालः–भोः देव ।

अधिकारी–एतस्याः नार्यः शिरश्छेदनं शीघ्रं कर्तव्यम् । तस्यां प्रति का अपि दया न दर्शितव्या ।

तारा–(रुदित्वा) निर्दोषा अस्मि देव ।

चाण्डालः–(हरिश्चन्द्रं प्रति) शीघ्रं तस्याः शिरश्छेदनं कुरु । (कुठारं दत्वा) गृह्यतां एषः कुठारः । मम आज्ञा अन्यथा न भवेत् ।

हरिश्चन्द्रः—(कुठारं गृहित्वा) तत् एव शीघ्रं भविष्यति हे देव।

(अधिकारी चाण्डालश्च गतौ)

तारे मरणाय तत्परा भव प्राणप्रिये। इदम् एव लिखितं विधिना अस्माकं भाग्येषु।

तारा—किन्तु अहं निर्दोषा अस्मि देव।

हरिश्चन्द्रः—विवादस्य अत्र नावकाशः तारे। या आज्ञा सा आज्ञा। स्वामिनः आज्ञा अचिरं पालनीया।

तारा—तत् एव भवतु भगवन्। अहं तत्परा अस्मि।

हरिश्चन्द्रः—किन्तु नेत्राभ्यां पश्यन अहं तव शिरश्छेदनं कर्तुं न समर्थः तारे। अतः यावत् अहं वस्त्रेण नेत्रे छादयामि तावत् त्वं जगदीश्वरं भज। (वस्त्रेण नेत्रे छादयति)

तारा—(विलपति)

गीतम्—

भाग्ये किं किं लिखति विधाता।
छत्रमुकुटधारिणः संकटे, वधिकगतिः संजाता।।

१.

स्त्री कुत्र कुत्र पुत्रः वा कुत्र अयोध्यापालः ?
तारा भवति श्रेष्ठिनः दासी, दशति रोहितं व्यालः।।

२ ·

कुसुम-शायिने रोहिताय, शय्या भूतलः करालः ।
ताराशिरश्छेदने नृपतिं, आदिशति तु चाण्डालः ।।

३ ·

अत्र चिरस्थायी भुवि नहि कः, सर्वः खलु संदिग्धः ।
भवतु चिरस्मरणीयः काले, रोहितशवः अदग्धः ।।

(तारा शिरः छेदनाय भूमौपातयति)

भवतु भवति यत्मया लभ्यते नकं: वा वैकुण्ठः ।
अधः पततु तव आर्य कुठारः, भुवि एषः मम कण्ठः ।।

हरिश्चन्द्रः—भोः तारे । अहं शिरस् छेदन करोमि । तत्परा भव ।

तारा—तत्परा अस्मि भगवन् ।

(हरिश्चन्द्रः कुठारं छेदनाय उत्रयति । सहसा चतुर्भुजरुपधारी भगवान् आगत्य हरिश्चन्द्रस्य कुठारं रुगद्धि । इन्द्रः । विश्वामित्रः वसिष्ठः नारदः काशीराजपुत्रः सर्वे अनुयान्ति ।)

भगवान्—अलं अनया परीक्षया हरिश्चन्द्र । त्वं वस्तुतः अद्वितीयः महादानी राजा अस्मिन् मर्त्यलोके । (रोहितं स्पृष्ट्वा) उत्तिष्ठ रोहित । (रोहितः उत्तिष्ठति) कल्पशतपर्यन्तं त्वं अयोध्यायाः एकछत्रराजा भव । हे तारे राजमर्हिषि । पत्या सह त्वं शीघ्रं सदेह-वैकुण्ठवासिनी भव ।

सर्वे–जयतु राजा हरिश्चन्द्रः ।

नारदः–सः दानी ।

विश्वामित्रः–मर्त्यलोके अद्वितीयः महादानी ।

इन्द्रः–आप्रलयं एव तस्य कथा चिरस्मरणीया भवेत् ।

भगवन्–एवम् अस्तु !

रोहितः मात्रा पित्रा तथा अन्यैः परावृतः तिष्ठति । ते प्रार्थयन्ति ।

गीतम्—

जयतु हरिश्चन्द्रः सः, जयतु सती तारा ।
आप्रलयं भुवि तयोः, वहतु कीर्तिधारा ।।
राज्यं पुत्रं त्यक्त्वा, सेवकवृत्तिं भुक्त्वा ।
तस्य घोरपरीक्षया, भग्ना भवकारा ।।
तारा भूत्वा दासी, सः श्मशानभूवासी ।
सोढा सर्वैः तैः, भवव्यथा अपारा ।।

— श्रीकृष्णसमर्पणमस्तु —

—(भारतवन्दना :—

हिम-शिला-मण्डितं भारतम् ।
योग - विज्ञान - विद्यारतम् ।।
तं च वंदामहे, तं च सेवामहे ।
तं नमामः नमामः वयम् ।।

१ ·

अमृतं यस्य गंगाजलम् ।
अमृतं यस्य काननफलम् ।।
स्वर्णमिश्रितमरुः कल्पवृक्षः तरुः ।
यस्य नीडेषु पक्षीकलम् ।।

२ ·

देवता यस्य विद्या परा ।
अन्नदात्री धरा उर्वरा ।।
यत्र देवः नरः लोकसेवापरः ।
सस्यश्यामलधरित्रीतलम् ।।

३ ·

भव्य-निर्माण-कृषि-जागर्तिः ।
दिव्य-वाणिज्य-शीला गतिः ।।
यत्र शान्तिः सदा दिव्यक्रान्तिः सदा ।
यस्य ख्यातं अहिंसाव्रतम् ।।

केन्द्रीय विद्यापीठ वाराणसी
संस्कृतविभाग